शतरि [A]रायन्-न्ती, [1]कीरः ।

(1444) "रोड़ृ उन्मादे" (I-भ्वादिः-356. अक. सेट्. पर.)

केचिदमुं धातुं न पठन्ति ।

रोडकः-डिका, [B]प्ररोडकः-डिका, [2]रुरोडिषकः-षिका, रोरोडकः-डिका ;
रोडिता-त्री, रोडयिता-त्री, रुरोडिषिता-त्री, रोरोडिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकखोरतिवत् (363) बोध्यानि ।

(1445) "रौड़ृ अनादरे" (I-भ्वादिः-355. सक. सेट्. पर.)

'रौट्ट—' इति केचित् ।

रौडकः-डिका, रौडकः-डिका, रुरौडिषकः-षिका, [3]रोरौडकः-डिका ;
रौडिता-त्री, रौडयिता-त्री, रुरौडिषिता-त्री, रोरौडिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकखोरतिवत् (363) बोध्यानि । [C]रौडयः ।

---

1. 'की' इति रायति = शब्दायतेऽसाविति कीरः = शुकः, शारिका वा । 'सुपि स्थः' (3-2-4) इत्यत्र, 'सुपि' इति योगविभागात् कर्तरि कप्रत्यये, 'आतो लोप इटि च' (6-4-64) इत्याकारलोपे च रूपमेवम् ।

2. सन्नन्ते द्वित्वादिकेषु कृतेषु 'ह्रस्वः' (7-4-59) इत्यभ्यासस्य ह्रस्वः । स च 'एच इग्घ्रस्वादेशे' (1-1-48) इति परिभाषितत्वात् अत्रोकाररूप इति ज्ञेयम् ।

3. यङन्ते द्वित्वादिकेषु कृतेषु, 'ह्रस्वः' (7-4-59) इत्यभ्यासह्रस्वः । 'गुणो यङ्लुकोः' (7-4-82) इति गुणः । एवञ्चात्र पूर्वखण्डे ओकारः, उत्तरखण्डे औकार इति भेदो बोध्यः ।

A. 'रायद्वयस्त्यानरुचौ रथेऽपि तं भक्तितिष्ठ्यापयिषुं स दृष्ट्वा ।' धा. का. 2.31.

B. 'प्ररोडकानङ्गविलोलितैर्नॄनान् रतावडद्भिर्ललनाजनैः कलैः ॥' धा. का. 1.46.

C. 'अकद्वरिकीडनभूततोडकान् प्रहूडितान् होडदरौडयभिक्षुकैः ।' धा. का. 1.46.

श्रीगुरुभ्यो नमः